Sarth E- Journal

Saarth E-Journal

# Saarth E-Journal of Research

E-mail : sarthejournal@gmail.com
www.sarthejournal.com

ISSN NO : 2395-339X
Peer Reviewed
Vol.8 No.17

Impact Factor
Quarterly
Jan-Feb-Mar 2023

# भारतीयसमाजे हिन्दूविवाहः

**शास्त्री चेतन मुकुटभाई**

**प्रस्तावना**

विवाहः एका सामाजिक-सांस्कृतिकी संस्था अस्ति। विवाहस्य एव आधारस्तम्भेन मानवस्य अस्तित्वं स्थितं वर्तते। समाजस्य निरन्तरतायाः आधारः संतानानि सन्ति तथा संतानानामुत्पत्तिः जन्मनः उपरि आधारिता वर्तते। संतानानां जन्मने स्त्री-पुरूषयोः लैङ्गिकसम्बन्धः आवश्यकः अस्ति। समाजद्वारा लैङ्गिकसंबन्धान् नियमयुक्तान् कर्तुम् एव विवाहनाम्न्याः संस्थायाः प्रादुर्भावः जातः वर्तते। प्रत्येकसमाजानां सांस्कृतिकनियमानां तथा सामाजिकनियमानां प्रभावः विवाहोपरि भवति एव अत एव तेषाम् उद्देश्येषु भिन्नता भवति। उदाहरणरूपे हिन्दूविवाहस्य प्रमुखम् उद्देश्यं धर्मस्य पालनं, संतानोत्पादनं, यौन-आकाङ्क्षापूर्तिः चास्ति । हिन्दूविवाहे धर्माय प्रधानता प्रदत्ता वर्तते, यौनतृप्तये प्रधानता न प्रदत्ता वर्तते। अत्र विवाहस्य अर्थं प्रतिपाद्य हिन्दूविवाहस्य विशेषताः प्रतिपादितानि सन्ति।

- **हिन्दूविवाहः**

  हिन्दूविवाहः एकः धार्मिकः संस्कारः अस्ति। हिन्दूसामाजिकव्यवस्थायां प्रारंभादेव विवाहस्य स्थानं महत्वपूर्णमस्ति कारणं वैदिकयुगादेव विवाहः एकस्याः धार्मिकक्रियायाः रूपे मन्यते। ऋग्वेदे कथितं वर्तते यत् - “विवाहस्य उद्देश्यं गृहस्थी भूत्वा यज्ञानां संपादनस्य तथा संतानोत्पत्तेः अस्ति ।” पाश्चात्यविचारकैः विवाहस्य मुख्यम् उद्देश्यं यौनतृप्तिः इति मता वर्तते, किन्तु हिन्दूविवाहस्य मुख्यम् उद्देश्यं धर्मपालनमेव अस्ति।हिन्दूविवाहे धर्मस्य प्रधानता अस्ति अतः सांप्रतमपि तस्मिन् स्थायित्वं वर्तते।

- **हिन्दूविवाहस्य अर्थः**

  हिन्दूविवाहः एकः पूर्णः संस्कारः वर्तते। अस्य माध्यमेन एव व्यक्तित्त्वाय पूर्णता प्राप्यते। हिन्दूविवाहस्य उद्देश्यं स्वधर्मस्य पालनं, प्रजोत्पत्तिः, यौनसुखं चास्ति। प्राथमिकरूपेण कर्तव्यानां पालनस्य कारणात् अस्य सर्वोपरी तथा मौलिकम् उद्देश्यं धर्मः एव अस्ति। हिन्दूविवाहः वस्तुतस्तु स्त्री-पुरूषयोः शाश्वतं मेलनं वर्तते येन तौ गृहस्थाश्रमं प्रविष्टुं समर्थौ भवेताम्। विवाहस्य पवित्रस्य बन्धनस्य विच्छेदः अस्वाभाविकः अस्ति। अतः हिन्दूविवाहः तादृशम् औपचारिकं कृत्यं मन्यते येन एकः व्यक्तिः स्वस्य गृहस्थस्य जीवनस्य प्रारम्भं करोति तथा जीवनस्य अन्तिमं लक्ष्यं पुरूषार्थं प्रति अग्रगामी भवति ।

- हिन्दूविवाहस्य विशेषताः

  हिन्दूविवाहस्य प्रमुखाः विशेषताः निम्नोल्लिखिताः सन्ति ---

  1. एकः धार्मिकः संस्कारः - हिन्दूविवाहः एकः धार्मिकः संस्कारः वर्तते कारणं हिन्दूशास्त्रकाराणां मतानुसारं विवाहः केवलायाः यौनसुखपूर्तेः साधनं नास्ति अपि तु जीवनस्य पूर्णतायै तथा मोक्षप्राप्तये अपि अनिवार्यमस्ति।
  2. एकविवाहः - हिन्दूविवाहस्य अपरा प्रमुखा विशेषता ‘एकविवाहः’ इति अस्ति। तथा एकविवाहः प्रारंभादेव आदर्शः मतः वर्तते। हिन्दूशास्त्रकारैः अपि हिन्दूभ्यः अपरस्य विवाहस्य अनुमतिः केवलासु विशिष्टासु एव परिस्थितिषु एव प्रदत्ता वर्तते। ‘हिन्दूविवाह-अधिनियम, १९५५’ अनुसारं साम्प्रतं एकविवाहः एव हिन्दूषु वैधानिकदृष्ट्या अनिवार्यमस्ति ।
  3. अन्तर्विवाहः - हिन्दूषु विवाहः अन्तर्विवाही अस्ति अर्थात् प्रत्येकहिन्दूना स्वस्यामेव जात्याम् विवाहः कर्तव्यः।
  4. सगोत्रः, सप्रवरः तथा सपिण्डबहिर्विवाहः - यद्यपि हिन्दूषु स्वस्यामेव जात्यां विवाहस्य प्रथा अस्ति तथापि स्वगोत्रे, स्वपिण्डे, स्वप्रवरे च विवाहः न भवति। गोत्रेण समानपूर्वजस्य संतानेन सह अभिप्रायः अस्ति। प्रवरेण समानपूर्वजेन सह वा समानऋषीणां नाम्नः उच्चारणकर्त्रा सह सम्बन्धः अस्ति। पिण्डस्य अर्थः समानः पिण्डः अथवा शरीरधारी इति अस्ति। हिन्दूविवाह-अधिनियमानुसारं मातुः त्रिवंशपर्यन्तं तथा पितुः पञ्चवंशपर्यन्तं सपिण्डता मन्यते।
  5. विवाहस्य एकः विशिष्टः विधिः - धार्मिकसंस्थानत्वात् हिन्दूषु विवाहस्य एकः विशिष्टः विधिः वर्तते। विवाहाय होम-पाणिग्रहण-सप्तपदीभूतानि त्रीणि कृत्यानि अनिवार्यानि मतानि वर्तन्ते । इमानि कृत्यानि ब्राह्मणद्वारा पवित्रम् अग्निं साक्षी मत्वा वेदमन्त्रैः द्वारा संपन्नानि भवन्ति। एतेषां कृत्यानां विवाहः अपूर्णः मन्यते।
  6. विधवायाः पुनर्विवाहः तथा विवाहविच्छेदप्रतिबन्धः- हिन्दूषु विवाहं जन्म-जन्मान्तरस्य मिलनं कथितं वर्तते। विवाहस्य बन्धनं तादृशं बन्धनम् अस्ति यस्य विच्छेदः अशक्यः वर्तते। हिन्दूस्त्र्यै पतिः तस्याः देवता वर्तते तथा पतिमरणानन्तरं द्वितीयस्य पत्युः

ग्रहणम् अधर्मः मतः वर्तते। एतादृशैः विचारैः विधवापुनर्विवाहस्य उपरि तथा विवाह-विच्छेदस्योपरि परम्परागतरूपे प्रतिबन्धः अस्ति। यद्यपि एतेभ्यः नैकैः सामाजिकविधानैः मान्यता प्रदत्ता वर्तते, परन्तु तथापि एतेषां प्रचलनमधिकं न सञ्जातं वर्तते।

- **उपसंहारः**

इत्थं विविधग्रन्थानामनुसारं तथा भारतीय-अधिनियमानुसारं हिन्दूविवाहस्य अर्थः विशेषताः च समुल्लिखिताः ज्ञायन्ते। अत्र ऋग्वेदस्य प्रमाणेन हिन्दूविवाहस्य अर्थः स्पष्टीकृतः तथा भारतीयविवाह-अधिनियमानुसारं हिन्दूविवाहस्य विशेषताः वर्णिताः। एतेन ज्ञायते यत् समग्रैः हिन्दूभिः भारतीयविवाह-अधिनियमानां पालनं कृत्वा एव स्ववैवाहिक जीवनं यापनीयं तेन एव शास्त्राणां वचनानां पालनं तथा च संविधानस्य च नियमानां पालनम् अवश्यमेव भविष्यति।

- **संदर्भग्रन्थानुक्रमः**


१) मनुस्मृतिः – चौखम्बा सुरभारती प्रकाशन, वाराणसी, उत्तरप्रदेश

२) हिन्दू विवाह अधिनियम – १९५५, १९५५ का अधिनियम संख्याङ्क २५

३) ऋग्वेदसंहिता – गीताप्रेस गोरखपुर, उत्तरप्रदेश

४) लग्न संस्कार – प्रकाशक अने विक्रेता ब्रह्मर्षि संस्कार धाम, नडीयाद


- **Websites**


1) WWW.WIKIPEDIA.ORG
2) WWW.QUORA.COM